मलः। अस्य जलभागः शिराभिर्वस्तिन्नीतोमूत्रं भवति उक्तं च "आहारस्य रसः सारःसारहीनोमलद्रवः। शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात्। शेषं कीट्टं भवेत्तस्य तत् पुरीषं निगद्यते। समानवायुना नीतं तत्तिष्ठति मलाशये" तत्र मलाशयालयेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण, पुरीषं गुदमार्गेण, शरीराद्बहिर्याति। उक्तं च "मूत्रन्तूपस्थमार्गेण, पुरीषं गुदमार्गतः। अपानवायुना क्षिप्तं बहिर्याति शरीरतः"। उपस्थः शिश्नोभगश्च। रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरोरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति उक्तं च "रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत्। केदारेषु यथा कुल्या पुष्णाति विविधौषधीः। तथा कलेवरे धातून् सर्वान् बर्द्धयते रसः"। रसस्तु तत्र तत्र त्रिधा भिद्यते उक्तं च चरके "स्थूलसूक्ष्ममलैर्भेदैस्तत्रस्तत्र त्रिधा रसः"। अधिकआहारपाकशब्दे वक्ष्यते।

**आमिक्षा** स्त्री आमिष्यते सिच्यते मिष—सक्। तप्ते पक्के दुग्धे दधियोगाज्जाते (छाना) पदार्थे। "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्योवाजिनम्" श्रुतिः "आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्" भट्ट का०।

**आमिक्षीय** न० आमिक्षायै हितं छ। आमिक्षोपकरणे दधि "आमिक्षीयं दधि क्षीरं पुरोडाश्यं तथौषधम्" भट्टिः। ख आमिक्षीणमप्यत्र न०। यत् आमिक्ष्यमप्यत्र न०।

**आमितौजि** पुंस्त्री अमितौजसोऽपत्यम् बाह्वा० इञ् सलोपश्च। अमितौजसोऽपत्ये स्त्रियां ङीप्।

**आमित्रि** पुंस्त्री अमित्रस्यापत्यं इञ्। अमित्रापत्ये तत्र भवादि गहा० छ। आमित्रीयः तद्भवादौ त्रि० युवापत्ये तु नडा० फक्। आमित्रायणः अमित्रयुवापत्ये आमित्रेरपत्यम् तिका० फिञ्। आमित्रायणिः तदपत्ये। अमित्रस्येदम् अण्। आमित्रः शत्रोःसम्बन्धिनि त्रि० "नसामामित्रो व्यथिरादधर्षति" ऋ० ६,२८,२।

**आमिश्र** त्रि० आ+मिश्र—घञ्। मिलिते संश्लिष्टे। "चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रयत्" नैष०। वेदे क्वचित् रस्य लः। आमिश्लः। "स सोम आमिश्लतमः" ऋ० ६,२९,४।

**आमिष्** न० आमिषति सिञ्चति स्नेहम् आ+मिष—क्विप्। मांसे "आयेवयो नवर्ष्टत्यामिषि" ऋ० ६,४६,१४ "आमिषि मांसे" भा०।

**आमिष** न० आमिषति स्नेहम् आ+मिष—सेचने क अस्थिषच् दीर्घश्च, वा। १मांसे स्नेहातिरेकात्तस्य तथात्वम् २भोग्यवस्तुमात्रे ३उत्कोचे ४सुन्दररूपादौ ५लोभे ६लोभनीये विषये च। तत्र मांसे "उपानयत् पिण्डमिवामिषस्य" रघुः "आमिषं कलहं हिंसां-वर्षवृद्धौ विवर्ज्जयेत्" स्मृतिः "भुङ्क्ते यस्य निरामिषं स हि भवेज्जन्मान्तरे पण्डितः" ज्योति०। "जन्मान्तरे पाण्डित्यकामो जन्मतिथावामिषं न भुञ्जीतेति" गदाधरः। "कालशाकं महाशाकं खड्गलोहामिषं मधु" "दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः" मनुः "सात्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" दुर्गो०त० पु० नाधीयीतामिषं जग्ध्वा" "तच्चामिषेण कर्त्तव्यम्" इति च मनुः। लोभनीये "रम्भान्वेषणदक्षाणां द्विषामामिषतां ययौ" "आकृष्य सद्गुणजुषा सुरसामिषेण" आनन्दवृन्दा०। "प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्द्धिनः" मनुः। "पत्राणामामिषं पर्णं जम्बीरञ्च फलेष्वपोति" स्मृतौ निरामिषव्रते आमिषतुल्यतया बर्ज्जनीये ७पर्णे ८ जम्बीरफले च।

**आमिषप्रिय** पु० ६त०। १कङ्कपक्षिणि। २मांसाभिलाषिणि त्रि०।

**आमिषाशिन्** त्रि० आमिषमश्नाति अश—णिनि ६त०। मांसभक्षके "दिनोपवासी तु निशामिषाशी" हास्या० स्त्रियां ङीप्। आमिषभुगादयोऽप्यत्र।

**आमिषी** स्त्री आमिषं तदाकारोऽस्त्यस्य जटायाम् अर्श०अच् गौरा० ङीष्। जटामांस्याम्। ततः चतुरर्थ्याम् सख्या० यत्। आमिष्यः आमिषीसन्निकृष्टदेशादौ त्रि०।

**आमुक्त** त्रि० आ+मुच—क्त। परिहिते "आमुक्तमुक्तालतमस्य वक्षः" माघः।

**आमुक्ति** स्त्री आ—मुच—क्तिन्। १परिधाने, मर्य्यादायाम् वा अव्ययी०। २मुक्तिपर्य्यन्ते अव्य० "आमुक्ति श्रियमन्विच्छेत्"। समासाभावे आ मुक्तेरित्येव।

**आमुख** न० आमुखयति अभिमुखीकरोति दर्शनार्थं परिषदोऽनेन आमुख+णिच्-करणे अच्। नाटकाङ्गभेदे "तल्लक्षणभेदोदाहरणानि" सा०द० यथा "नटी विदूषकोवापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा। सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते। तस्यानुचरः पारिपार्श्विकः। तस्मात् किञ्चिदूनोनटः"।